# श्रीमद् भागवत रसिक कुटुंब

## ॥ श्री गीत गोविंद॥



॥  सप्तमः सर्गः ॥(नागरनारायणः)

(वसंततिलकावृत्तम्)

अत्रान्तरे च कुलटाकुलवर्त्मपात-

सं(ञ्)जातपातक इव स्फुटलाञ्छनश्रीः ।

वृन्दावनान्तरमदीपयदं(म्)शुजालैर्-

दिक्सुन्दरीवदनचन्दनबिन्दुरिन्दुः ॥ 1॥

(आर्या)

प्रसरति शशधरबिम्बे विहितविलम्बे च माधवे विधुरा ।

विरचितविविधविलापं(म्) सा परितापं(ञ्) चकारोच्चैः ॥ 2॥

॥ गीतम् 13 ॥

(अथ त्रयोदशः प्रबन्धो गौडमालवरागेण प्रतिमण्ठताले गीयते)

कथितसमयेऽपि हरिरहह न ययौ वनम् ।

मम विफलमिदममलरूपमपि यौवनम् ॥

यामि हे कमिह शरणं(म्) सखिजनवचनवञ्चिता ॥ 1॥

यदनुगमनाय निशि गहनमपि शीलितम् ।

तेन मम हृदयमिदमसमशरकीलितम् ॥ 2॥ यामि हे

मम मरणमेव वरमिति वितथकेतना ।
किमिह विषहामि विरहानलमचेतना ॥ 3॥ यामि हे

मामहह विधुरयति मधुरमधुयामिनी ।
कापि हरिमनुभवति कृतसुकृतकामिनी ॥ 4॥ यामि हे

अहह कलयामि वलयादिमणिभूषणम् ।
हरिविरहदहनवहनेन बहुदूषणम् ॥ 5॥ यामि हे

कुसुमसुकुमारतनुमतनुशरलीलया ।
स्रगपि हृदि हन्ति मामतिविषमशीलया ॥ 6॥ यामि हे

अहमिह निवसामि न गणितवनवेतसा ।
स्मरति मधुसूदनो मामपि न चेतसा ॥ 7॥ यामि हे

हरिचरणशरणजयदेवकविभारती ।
वसतु हृदि युवतिरिव कोमलकलावती ॥ 8॥ यामि हे

(शार्दूलविक्रीडितेन)

तत्किं(ङ्) कामपि कामिनीमभिसृतः(ख्) किं(वँ) वा कलाकेलिभिर्-

बद्धो बन्धुभिरन्धकारिणि वनाभ्यर्णे किमुद्भ्राम्यति ।
कान्तः(ख्) क्लान्तमना मनागपि पथि प्रस्थातुमेवाक्षमः(स्)
सं(ङ्)केतीकृतमञ्जुवञ्जुललताकुञ्जेऽपि यन्नागतः ॥ 1॥

(त्रिष्टुप)

अथागतां(म्) माधवमन्तरेण
सखीमियं(वँ) वीक्ष्य विषादमूकाम् ।
विशङ्कमाना रमितं(ङ्) कयापि
जनार्दनं(न्) दृष्टवदेतदाह ॥ 2॥

॥ गीतम् 14 ॥

(अथ चतुर्दशप्रबन्धो वसन्तरागेण एकतालीताले गीयते)
स्मरसमरोचितविरचितवेशा ।
गलितकुसुमदलविलुलितकेशा ॥
कापि चपला मधुरिपुणा
विलसति युवतिरधिकगुणा ॥ 1॥

हरिपरिरम्भणवलितविकारा ।
कुचकलशोपरि तरलितहारा ॥ 2॥ कापि चपला मधुरिपुणा

विचलदलक लितानन‌चन्द्रा ।
तदधरपानरभसकृततन्द्रा ॥ 3॥ कापि चपला मधुरिपुणा

चञ्चलकुण्डलदलितकपोला ।

मुखरितरसनजघनगतिलोला ॥ 4॥ कापि चपला मधुरिपुणा

दयितविलोकितलज्जितहसिता ।

बहुविधकूजितरतिरसरसिता ॥ 5॥ कापि चपला मधुरिपुणा

विपुलपुलकपृथुवेपथुभङ्गा ।

श्वसितनिमीलितविकसदनङ्गा ॥ 6॥ कापि चपला मधुरिपुणा

श्रमजलकणभरसुभगशरीरा ।

परिपतितोरसि रतिरणधीरा ॥ 7॥ कापि चपला मधुरिपुणा

श्रीजयदेवभणितहरिरमितम् ।

कलिकलुषं(ञ्) जनयतु परिशमितम् ॥ 8॥ कापि मधुरिपुणा

(द्रुतविलम्बित)

विरहपाण्डुमुरारिमुखाम्बुज-

द्युतिरियं(न्) तिरयन्नपि वेदनाम् ।

विधुरतीव तनोति मनोभुवः(स्)

सुहृदये हृदये मदनव्यथाम् ॥ 1॥

॥ गीतम् 15॥

(अथ पञ्चदशप्रबन्धो गुर्जरीरागेण एकतालीताले गीयते)

समुदितमदने रमणीवदने चुम्बनवलिताधरे ।
मृगमदतिलकं(लँ) लिखति सपुलकं(म्) मृगमिव रजनीकरे ॥
रमते यमुनापुलिनवने विजयी मुरारिरधुना ॥ 1॥

घनचयरुचिरे रचयति चिकुरे तरलिततरुणानने ।
कुरबककुसुमं(ञ्) चपलासुषमं(म्) रतिपतिमृगकानने ॥ 2॥ रमते

घटयति सुघने कुचयुगगगने मृगमदरुचिरूषिते ।
मणिसरममलं(न्) तारकपटलं(न्) नखपदशशिभूषिते ॥ 3॥ रमते

जितविसशकले मृदुभुजयुगले करतलनलिनीदले ।
मरकतवलयं(म्) मधुकरनिचयं(वँ) वितरति हिमशीतले ॥ 4॥ रमते

रतिगृहजघने विपुलापघने मनसिजकनकासने ।
मणिमयरसनं(न्) तोरणहसनं(वँ) विकिरति कृतवासने ॥ 5॥ रमते

चरणकिसलये कमलानिलये नखमणिगणपूजिते ।
बहिरपवरणं(यँ) यावकभरणं(ञ्) जनयति हृदि योजिते ॥ 6॥ रमते

रमयति सुदृशं(ङ्) कामपि सुभृशं(ङ्) खलहलधरसोदरे ।

किमफलमवसं(ञ्) चिरमिह विरसं(वँ) वद सखि विटपोदरे ॥ 7॥ रमते

इह रसभणने कृतहरिगुणने मधुरिपुपदसेवके ।
कलियुगचरितं(न्) न वसतु दुरितं(ङ्) कविनृपजयदेवके ॥ 8॥ रमते

(शार्दूलविक्रीडितेन)
नायातः(स्) सखि निर्दयी यदि शठस्त्वं(न्) दूति किं(न्) दूयसे
स्वच्छन्दं(म्) बहुवल्लभः(स्) स रमते किं(न्) तत्र ते दूषणम् ।
पश्याद्य प्रियसङ्गमाय दयितस्याकृष्यमाणं(ङ्) गुणै-
रुत्कण्ठार्तिभरादिव स्फुटदिदं(ञ्) चेतः(स्) स्वयं(यँ) यास्यति ॥ 1॥

॥ गीतम् 16 ॥
(अथ षोडशप्रबन्धो देशाङ्करागेण रूपकताले गीयते)
अनिलतरलकुवलयनयनेन ।
तपति न सा किसलयशयनेन ॥
सखि या रमिता वनमालिना ॥ 1॥

विकसितसरसिजललितमुखेन ।
स्फुटति न सा मनसिजविशिखेन ॥ 2॥ सखि या

अमृतमधुरमृदुतरवचनेन ।
ज्वलति न सा मलयजपवनेन ॥ 3॥ सखि या

स्थलजलरुहरुचिकरचरणेन ।
लुठति न सा हिमकरकिरणेन ॥ 4॥ सखि या

सजलजलदसमुदयरुचिरेण ।
दलति न सा हृदि चिरविरहेण ॥ 5॥  सखि या

कनकनिकषरुचिशुचिवसनेन ।
श्वसिति न सा परिजनहसनेन ॥ 6॥ सखि या

सकलभुवनजनवरतरुणेन ।
वहति न सा रुजमतिकरुणेन ॥ 7॥ सखि या

श्रीजयदेवभणितवचनेन ।
प्रविशतु हरिरपि हृदयमनेन ॥ 8॥ सखि या

(जगती)

मनोभवानन्दन चन्दनानिल
प्रसीद रे दक्षिण मुञ्च वामताम् ।
क्षणं(ञ्) जगत्प्राण विधाय माधवं(म्)
पुरो मम प्राणहरो भविष्यसि ॥ 1॥

## (हरिणी)

रिपुरिव सखीसं(वँ)वासोऽयं(म्) शिखीव हिमानिलो
विषमिव सुधारश्मिर्यस्मिन्दुनोति मनोगते ।
हृदयमदये तस्मिन्नेवं(म्) पुनर्वलते बलात्
कुवलयदृशां(वँ) वामः(ख्) कामो निकामनिरङ्कुशः ॥ 2॥

## (वसंततिलकावृत्तम्)

बाधां(वँ) विधेहि मलयानिल पञ्चबाण
प्राणान्गृहाण न गृहं(म्) पुनराश्रयिष्ये ।
किं(न्) ते कृतान्तभगिनि क्षमया तरङ्गै-
रङ्गानि सिञ्च मम शाम्यतु देहदाहः ॥ 3॥

## (शार्दूलविक्रीडितेन)

सान्द्रानन्दपुरन्दरादिदिविषद् वृन्दैरमन्दादरा-
दानन्दैर्मुकुटेन्द्रनीलमणिभिः(स्) सन्दर्शितेन्दीवरम् ।
स्वच्छन्दं मकरन्दसुन्दरगलन्मन्दाकिनीमेदुरं,
श्रीगोविन्दपदारविन्दमशुभस्कन्दाय वन्दामहे ॥ 4 ॥

इति श्रीगीतगोविंदे नागरनारायणो नाम सप्तमः सर्गः॥

